# 51 - एकपञ्चाश दशकम्
# अघासुर वधम्

कदाचन व्रज शिशुभिस् समं भवान् वनाशने विहित मति: प्रगेतराम् ।
समावृतो बहुतर वत्स मण्डलै: सतेमनैर् निरगम दीश जेमनै: ॥॥51-1॥

विनिर्यतस् तव चरणाम्बुज द्वयात् उदञ्चितं त्रिभुवन पावनं रज: ।
महर्षय: पुलकधरै: कलेबरै: उदूहिरे धृत भव दीक्षणोत्सवा: ॥॥51-2॥

प्रचारयत्-यविरल शाद्वले तले पशून् विभो भवति समं कुमारकै: ।
अघासुरो न्यरुण दघाय वर्तनी भयानकस् सपदि शयान काकृति: ॥॥51-3॥

महाचल प्रतिम तनोर् गुहा निभ प्रसारित प्रथित मुखस्य कानने ।
मुखोदरं विहरण कौतुकाद् गता: कुमारका: किमपि विदूरगे त्वयि ॥॥51-4॥

प्रमादत: प्रविशति पन्नगोदरं क्वथत् तनौ पशुपकुले सवात्सके ।
विदन्निदं त्वमपि विवेशिथ प्रभो सुहृज्जनं विशरण माशु रक्षितुम् ॥॥51-5॥

गलोदरे विपुलित वर्ष्मणा त्वया महोरगे लुठति निरुद्ध मारुते ।
द्रुतं भवान् विदलित कण्ठ मण्डल: विमोचयन् पशुप पशून् विनिर्ययौ ॥॥51-6॥

क्षणं दिवि त्व दुपग मार्थ मास्थितं महासुर प्रभव महो महो महत् ।
विनिर्गते त्वयि तु निलीन मञ्जसा नभ:स्थले ननृतु रथो जगुस्सुरा: ॥॥51-7॥

सविस्मयै: कमल भवादिभिस् सुरै: अनुद्रुतस् तदनु गत: कुमारकै: ।
दिने पुनस् तरुण दशा मुपेयुषि स्वकैर्भवा नतनुत भोजनोत्सवम् ॥॥51-8॥

विषाणिका मपि मुरलीं नितम्बके निवेशयन् कबल धर: कराम्बुजे ।
प्रहासयन् कल वचनै: कुमारकान् बुभोजिथ त्रिदशगणैर् मुदा नुत: ॥॥51-9॥

सुखाशनं त्विह तव गोप मण्डले मखाशनात् प्रिय मिव देव मण्डले ।
इति स्तुतस् त्रिदशवरैर् जगत्पते मरुत्पुरी निलय गदात् प्रपाहिमाम् ॥॥51-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥